**Ex/Sans/PG/3.1/75/2018**

# MASTER OF ARTS EXAMINATION, 2018

(2nd Year 3rd Semester)

**SANSKRIT**

**Course : XI**

**[Sanskrit Prose]**

Time : Two Hours Full Marks : 30

*The figures in the margin indicate full marks.*

## क – विभागः

## (चम्पूरामायणम्)

१. सुरगिरा देवनागर्या लिप्या **पञ्च** प्रश्नाः समाधेयाः। 1×5=5

(क) दण्डकारण्ये आश्रमभागाः केन हेतुना अनु मीयन्ते स्म?

(ख) वामाचारवत् प्रति भाति वामाचारः — आद्यस्य उत्तरस्य च वामाचारशब्दस्य अर्थद्वयं वि व्रियताम्।

(ग) विराधस्य वेषः कीदृश आसीत्?

(घ) काननक्षमा कथं खननक्षमा बभूव?

(ङ) रामेण कानि अस्त्राणि कुतो लब्धानि?

(च) अगस्त्याश्रमे अजगराः केभ्यः किम् उप दिशन्ति?

(छ) शूर्पणखाया अवमानवृत्तान्तं श्रुत्वा रावणः कुत्र कान् प्र स्थापयामास?

[*Turn over*]

२. सुरगिरा देवनागर्या लिप्या **पदपञ्चकस्य** अर्थाः देयाः। 1×5=5

विस्रागन्धिना, न्यङ्कुः, क्रव्याशः, कार्तस्वरैणः, कण्डुलाः, वीरपाणवत्, पललभ्रमेण, पुरुहुतेन।

३. चम्पूरामायणम् अनुसृत्य शूर्पणखावृत्तान्तः वर्ण्यताम्। 5

**अथवा,**

अधोलिखितस्य श्लोकस्य छन्दोऽलंकारश्च निर्णीयेताम्।

तस्येदमाश्रमपदं सरसीरुहाक्षि

संख्याविहीनमहिमैकनिकेतनस्य।

भर्ता समस्तसरितां कुपितस्य यस्य

हस्तारविन्दमकरन्ददशामवाप।।

## ख–विभागः

## (हर्षचरितम्)

४. सुरगिरा देवनागर्या लिप्या **पञ्च** प्रश्नाः समाधेयाः। 1×5=5

(क) दाक्षिणात्येषु गौडेषु च कीदृशं काव्यं समादृतम्?

(ख) श्व–कुकवीनां सामान्यधर्मा बाणभट्टानुसारम् उल्लिख्यन्ताम्।

(ग) भासनाटकानां सपताकत्वं कथं भवति?

(घ) चक्रवाकचक्रवालं केन बाध्यमानम् आसीत्?

(ङ) क आसीत् संवादकः?

[*Turn over*]

(च) युद्धक्षेत्रात् प्रत्यावृत्तस्य द्वितीयराज्यवर्धनस्य कपोलयोः दुःखक्षामत्वं कविना कथम् उत्प्रेक्षितम्?

(छ) देवो हर्षः स्नात्वा कुत्र प्रसारितमुर्तिः समवातिष्ठत?

५. शोकेन कवलीकृतं ज्येष्ठं भ्रातरमपश्यत् — हर्षचरित-षष्ठोच्छ्वासस्य उद्दिष्टेऽंशे द्वितीयराज्यवर्धनस्य पितृमरणजनितशोकस्य वर्णना यथा उप लभ्यते तथा स्वकीयशैल्या उच्यताम्। 5

**अथवा,**

अथ तच्छ्रुत्वा निशितशिखेन शूलेनेवाहतः प्रविदीर्णहृदयो देवो हर्षः — कस्य सकाशात् किं श्रुत्वा हर्षदेवः प्रविदीर्णहृदयः संवृत्तः?

६. सुरगिरा देवनागर्या लिप्या अर्था लेखनीयाः। 5

कृतवर्णक्रमस्थितिः (नृपपक्षे); बहुभूमिकैः (देवकुलपक्षे); वार्धुषिकप्रयुक्तानि; वैधेयः; दिग्धरोपाहता।

**अथवा,**

द्वितीयराज्यवर्धने तपोवनं गन्तुम् उद्यते तत्रोपस्थितानां जनानां कीदृशी अवस्था जाता?

---